॥ऋद्धिमात्रयणेशिप्रयोगप्रारंभः॥
अथ

श्रीगणेशाय नमः ॥ ॥अथाग्रयणेष्टिप्रयोगो लिख्यते ॥ आनरग्निहोत्रानंत
रं नांदीश्राद्धं कृत्वा दर्भेष्वासीन इत्यादि० आग्रयणेष्टिमारभ्यमाणेन्वारभणीयेष्ट्या
यक्ष्ये ॥ कूष्मांडहोमं कृत्वा पुनः प्रणीय चतुर्होतृसारस्वतहोमयोर्विकल्पः ॥ संक
ल्पांते मन्वारंभणीयासमाप्य ॥ दर्भेष्वासीन इत्यादि० नवान्नप्राशनाधिकार
सिद्धिद्वारा श्रीपरमेश्वरप्रीत्यर्थं व्रीहिश्यामाकाग्रयणेष्ट्या यक्ष्ये ॥ विहरणादि०
ममाग्ने० अयं यज्ञाय० इमां मूर्जं यथातिथि आग्रयणीयं हविः० कालतसंत्रं
वा० आमावास्यतंत्रं० वेदं कृत्वा वेदिः० बर्हिराहरणे त्रीन् कलायान् संनह्य एकं पुन
सन्नह्य तिलतरेकं निधानं ॥ एवं त्रीणि निधानानि ॥ ततः शुल्बकरणादि० इध्मस्य
पित्रीन् कलान् सन्नह्य शुल्बे संभरति ॥ प्रस्तरमयं बर्हिरिध्मश्च ॥ द्यावापृथिव्या १

न्यपक्षेनैनत्॥त्रयोविंशतिधासंभरामि॥परिस्तृणीत॰नोभावग्नी॰कर्मणेवा
मित्यादिपात्रस.स्सादनकालेएकविंशतिकपालानिस्थालीइयंमेक्षणेच॰धृ
ष्योआज्यपात्रंमेक्षणेप्रणीताइयंअन्वाहार्यस्थालीवर्जंतदुलसंवापपात्रेइ
राणिअरणीअधिमंथनशकलंदर्भौच॥दक्षायवांप्रणीताइयमासाद्य॥वानस्प
त्योसीतिमंत्रान्त्याप्रक्षाल्य॥कोवोगृण्हातीत्येकस्मिन्॥आपोगृहीता॥कस्त्वा
गृण्हातिसत्वागृण्हातुकस्मैत्वागृण्हामितस्मैत्वागृण्हामिपोषायत्वा॥अनया
त्वागृण्हामि॥पृथिवीमनसाध्यायन्॥द्वितीयपात्रेपयोगृण्हाति॥देवोवइत्यप
उत्पूयदेवस्त्वासवितेतिपयउत्पुनाति॥आपोदेवीरित्यभिमंत्र्य॥पयोदेवाग्रेपु
रएतअग्निमयंयज्ञंनयाग्रेयज्ञपतिंधेहिता॥मिंद्राग्नीइंद्रत्वंवृत्रतूर्येत्वमिंद्रेपीथा
३

न हूँ मैनो सितमसि पवोसि मंत्र्य॥ब्रह्मन्नपः प्रणेष्यामि वा॥ब्रह्मन्नप्ययासि प्रणेष्या
मीत्यामंत्र्य॥कोवः प्रणयति॰कस्त्वा प्रणयति सत्वा प्रणयतु यथोदेवं प्रणयानि यद्
त्सत्सादयतु नः॥इदं महद्भुतप्रष्ठमुदाकुः सहस्रपोषं यजमानेभ्यश्च॥देवा गातु
विद इति वा॥भूयश्चैत्य विकलं ब्रह्मपूतास्थाब्रह्मपूतमसि कस्त्वा युनक्ति सत्वा
युनक्तु विश्वेभ्यः कामेभ्यो देवयज्यायै॥उभयं सादयति संविशंतामित्यादिना
नीवयेपुराणन्नस्माकान्नभिधाय॥दक्षिणतः जपति॥धूरसीत्यादि॰मित्रस्य
स्वेत्यस्याहुतिरहो वा॥मित्रस्यवः भ्यसिषं॥उरुवातायेत्यस्य शाकं स्वध्वे आहुतिः
॥प्राचीपसेसर त्वं॥उर्ध्वसेत्याहुतिः॥पयोमयि धेहीति सकृत्॥अपहतं र
क्षः आहुतिः॥इत्याहोतारं व्याख्याय भूर्वे पवित्रेण निधायपुराणान्निर्वपति॥अग्न २

यजुष्टंनिर्वपामि॥ततोग्निहोत्रहवणींपवित्रेप्रक्षाल्यशूर्पेकदेशेनवान्निर्वपति॥
इंद्राग्निभ्यांजुष्टं॰आग्नेंद्राभ्यामितिवा॥पुरोडाशीयान्॥विश्वेभ्योदेवेभ्योजुष्टं॰नि
र्वपान्॥पुनःस्रुक्प्रक्षालनं॥शूर्पैकदेशांतरेश्यामाकान्निर्वपति॥सोमायजुष्टं॰
पुनःप्रक्षाल्यनवपुरोडाशीयान्॥द्यावापृथिवीभ्यांजुष्टं॰॥अथवानिरुप्तंहविःप्र
त्यंतरेनिधायद्वितीयंनिर्वपति॥इदंदेवानांइदमुनःसहस्फात्यैवा॰एतेषाम
वृत्तिः॥अभिमर्शीकरणत्वात्॥ऊहमयीकंतिकेचित्॥द्विवचनांतोबहुवचनांतो
वोहः॥पुराणानवयोरेकबीजत्वात्॥द्विवचनांतः॥इमेदेवानां॰इमेउनः॰स्फात्यै
वा॰इमानिदेवानां॰इमान्युनःस्फात्यैवोनारात्यै॰उर्वंतरिक्षमन्वितंमन्वितिवा॥
अग्नेहव्यंरक्षस्व॥इंद्राग्नीहव्यंरक्षेथां॥विश्वेदेवाहव्यं॰रक्षध्वं॥सोमहव्यंरक्षस्व॥



अदित्यास्त्वा॰मुस्थेसादयामि॥

आ०६०

...नादक्षिणेनीह॰स्येथां॥ततोऽग्नीहोमः॥उत्तरेणगार्हपत्यंदर्भेषुस्रुवंजुहूम
...सादीप्रोक्षणीपंचसमिधःसंमार्गदर्भाआसाद्यपवित्रेकृत्वाप्रोक्षणीःसं
स्कृत्यपात्राणिप्रोक्ष्याज्यंसंस्कृत्यस्रुवंजुहूंसंमृज्याहवनीयदेशंगत्वापरिस्ती
र्यपंचगृहीतंगृहीत्वापंचसमिधोऽभ्याधायाग्रेणाहवनीयंगत्वादक्षिणतस्ति
ष्ठन्विश्वाहंजुहोति॥बालायुधायरा॰विश्वास्वाहा॥इंद्रायेदं॰येनत्वारःप॰स
र्वेस्वाहा॥देवेभ्यइदं॰॥ग्रीष्मोहे॰स्यामस्वाहा॥ग्रीष्महेमंतवसंतशरद्वर्षाभ्यइदं॰सं ३
वत्सराय॰अहुतास्यामस्वाहा॥इदुवत्सरायपरिवत्सरसंवत्सरेभ्यइदं॰॥भद्रान्नः
श्रेयः॰स्यामस्वाहा॥देवेभ्यःपितृभ्यश्चेदं॥अभ्यकायामग्निहोत्रहवण्यांप्रोक्षणीः
संस्कृत्य॥ब्रह्माणमामंत्र्य॥देवस्य॰भ्यामग्नयेत्वाजुष्टंप्रोक्षामीत्यग्निभ्यांनिर्वे

भ्यो देवेभ्यः सोमाय द्यावापृथिवीभ्यां ॥ कृष्णाजिनादानादि प्रथममेव ब्रीहिविकृतमा
रुयति न तुषनिरसनं पात्र्यां प्रस्कंदनं तंडुला ॥ अग्नेस्तनूः अवरक्षो वर्षवृद्धम व
र्षवृद्धा स्थ ॥ प्रतिला परापूतं पराध्मा वायुर्वो वि देवो वः ओसव्यन शेषेण स्या
माकानाञ्जीकृत्य हस्यार्थत्वात् ॥ श्यामाकेषु ब्रीहिधर्म इति प्रासेप्य विरुद्धत्वात् ॥ अ
ग्नेस्तनूरसि वाचं विसृज्य ॥ अवरक्षो वर्षवृद्धमसि वर्षवृद्धाः प्रतिला परापू
परा ध्मात्त रक्षसा आवबाढं वायुर्वो देवो वः निष्फलीकर्त्तवै सकृदेव कर्मे
णैना कृत्या फलीकरणं ॥ सर्वेषां फलीकरणानेकीकृत्य निदधाति ॥ एथक्षा
रुपा नसालनान्येकीकृत्य सहैव निनयति ॥ ततः कृष्णाजिनादानादि ॥ अः रे
त्वक्‌रसि तकृत ॥ पुरागानां अभ्यवकिरती सं तकृता ॥ यथाभागं अं ॥ नवानि

प्रथिव्यां इति

॥ ॐ अग्नेर्भ्राग्निभ्यां स्योना पृथिवी ध्यांन ॥ पुरोडाशार्थीना ॥ इदं विष्णुर्ये
मानवीयीवप्तलोहषड् उपलेप्रक्षाल्य देवस्य त्वेत्यादिमन्त्रेण गृह्णाति स्थंत
कृष्णाजिने कृष्णोऽस्य स्कन्दनं ॥ कपालोपधाने ॥ आग्नेयैन्द्राग्नयोः मकालिवलू ॥
प्रणीतापश्चात्स्थां समानीय ॥ अपाग्ने आदेवं धुनमसि पृथिवी एवमेव
प्रणीतादक्षिणं सहितां सोम्यस्थाली ॥ तत एककपालं प्रथमेन मन्त्रेण ॥ धर्त्रूणा
मित्यादि वत्तव्य सेतिस्थाल्यो एककपालानां ॥ पात्र्योः क्रमेण संवापः ॥ पात्रांत
तंडुलानां शूर्पादेव ॥ हव्योसि इति क्रमेण पिष्टान्युस्रूय ॥ देवो न इति तंडुलान् क्रमेण
समाप इत्यावृत्तिः ॥ अद्भ्यः परिसमुद्भिरित्यावृत्तिः ॥ मखस्य ॥ २ ॥ यथाभागं
॥ इदं पिंडं विभज्य ॥ [illegible] पृथिव्यां ॥ इदमहमित्यादि ॥ ५

पुरोडाशानधिश्रित्य॥घर्मोस्त्रिविश्वायुषः॥वैश्वदेवस्थाल्यांतंडुलानावपति॥

तथैवसौम्यस्थाल्यांश्यामाकतंडुलान्॥एककपालमधिश्रित्यप्रथनपरिमार्ज

नेपुरोडाशानां॥अंतरितंरक्षःइत्येवसर्वेषां॥देवस्त्वेतिपुरोडाशानां॥अग्निस्

इतिसर्वेषां॥संब्रह्मणेतिपुरोडाशानां॥निर्दग्धंनमेकोऽटस्यअभितपनादि॥नि

नीयोत्तरपरिग्रहादि॥उद्वासनकाले॥इदमहं॥पुरोडाशानां॥सूर्यज्योतिःसर्वे

षां॥स्योनंतइतिपात्र्योरासादयपात्रेचपृथक्पृथक्॥आग्नेयवर्जंतूष्णींअभिघारं

णं॥पुरोडाशापुद्वास्य॥आर्द्रोभुवनस्येतिस्थालीसहितंचरुद्वासनं॥नतस्मिन्स्त्री

इति॥एककपालमुद्वास्यासादयपात्रेनिधायकपालान्यभिवार्यसर्वेषामलंकरणं

॥अलंकरणकालेलौकिकाज्येनैककपालंपूरयित्वामग्नपृष्ठंकरोति॥आसीदं

सर्वतः श्रीतो सर्वतो मां भूतं भविष्यच्छ्रयेतां

५ लिस्यासाद्य॥ यज्ञोसि स॰ पुराणस्य॥ योनः कनीयः॰ अपत्नमिंद्राग्नी॰ अपत्नमग्नेइंद्रोवा॥
योनः कनीयः॰ अपत्नंविश्वेदेवानुदंतां॥ प्रजापतीरुद्रौ॥ आज्यपक्षेप्रकृतिवत्॥ अयंयज्ञः॥
निहव्यं॥ चतुर्होता॥ पंचहोता॥ अग्नेर्जनित्रमसि॥ अग्निमंथनं शकलमादायापरण्या
हवनीयं बर्हिषि निदधाति॥ वृषणौस्थः॥ अंसौ दर्भैः शकलेवदधाति॥ उर्वश्यसि॥ अध
रारणीमादत्ते॥ पुरूरवाः॥ उत्तरारणिं॥ घृतेनाक्ते॥ आज्यस्थाल्यां बिलेउभेअरणीयुगप
दनक्ति॥ आयुरसि॥ शकलेउभेअरणीसमवदधाति॥ अग्नयेमथ्यमानायानुब्रूहि॥
संप्रेष्यति॥ प्रथमायामृग्भिस्त्रिरनूक्तायां त्रिःप्रदक्षिणं मंथावर्त्तयति॥ गायत्रं छंदोनुप्रजा
यस्व॥ प्रथमं॥ त्रैष्टुभंछंदोनुप्रजायस्व॥ द्वितीयं॥ जागतंछंदोनुप्रजायस्व॥ तृतीयं॥ य
थासूत्रमतऊर्ध्वं मंथति॥ द्वितीयपक्षेनमंत्रावृत्तिः॥ जातायानुब्रूहि॥ जातेग्नै संप्रेष्य ५

ति॥अन्हियमाणायानुब्रूहि॥अन्हियमाणे संप्रेष्यति॥भवतन्नः समनसौ समोकसा
वरेपसौ॥मायज्ञंहिंसिष्टं मायज्ञपतिंजातवेदसौ शिवौ भवतमद्यनः॥अग्रेणोत्तरं
परिधिसंनिधानाहवनीयेतमग्निमनुप्रहरति॥अग्नावग्निश्चरति प्रविष्टऋषीणां
पुत्रो अधिराजएषः॥स्वाहाकृत्यब्रह्मणातेजुहोमिमादेवानांमिथुयाकर्भागधेयंस्वा
हा॥अविष्टायाग्नय इदं॥आज्यस्थाल्याः स्रुवेणतमग्निमभिजुहोति॥अथवेदइ
त्यादि॥प्रधानकाले आग्नेययागः प्रकृतिवत्॥ऐन्द्राग्नयागश्च॥आग्नेन्द्रपक्षे॥अ
ग्नीन्द्राभ्यामनुब्रूहि॥अग्नीन्द्रौयज॥अग्नीन्द्राभ्यामिदं॰अग्नीन्द्रयोरहंदेव॰येन्द्रिय
व्यंनादो भूयासं॥विश्वेभ्योदेवेभ्योनुब्रूहि॥विश्वान्देवान्यज॥विश्वेभ्योदेवेभ्यइ॰
विश्वेषांदेवानामहंदेवयज्यया॰प्राणैःसायुज्यंगमेयं॥स्रुवंप्रक्षाल्यश्यामाके

आ॰ शि॰

६

प्रचरति॥सोमायानुब्रूहि॥सोमंयज॥सोमायेदं॰सोमस्याहंदेवयज्यया॰इन्नहाभू
सं॥पुनःप्रक्षाल्यैककपालेनप्रचरति॥जुह्वामुपस्तीर्यमामेरित्यभिघार्यकृत्स्नंपु
रोडाशमवदायाशयंसर्वआपूर्यस्याभिघार्यनहविःप्रत्यभिघारणं॥उपांशुःप्रचा
रः॥द्यावापृथिवीभ्यां॥उपांशुअनुब्रूहि॥द्यावापृथिवीयज॥वषट्कृतेस्रुचाग्नौ
नकृत्स्नंपुरोडाशंप्रलिप्तमपर्यावर्तयन्जुहोति॥आज्यपसेप्तुवातम्नुर्हीतेनया
गः॥द्यावापृथिवीभ्यामिदं॰द्यावापृथिव्योरहं॰उभयोर्लोकयोर्ऋध्यासंभूमानंप्रति
ष्ठांगमेयं॥अग्नवाजानीहोमोध्रौवाज्येन॥स्विष्टकृतादि॰सर्वेषांएकमेवस्विष्टकृत्
प्राशित्रमिडानं पृथक्पृथक्यजमानभागान्॥प्रतिबीजं॥इडाभागप्राशित्रप्राशने
आकृतएवमंत्रःसर्वेषां॥आग्नेयस्यैवचतुर्धाकरणं॥दक्षिणाकालेप्रथमजंवत्समंत
र्वेदिनिदधाति॥मानासोहिमिति [illegible] यंतीकारः॥समान ६६

तंत्रेणनस्सैामभितितुयुक्तःस्रुगरुक्साशयः॥मात्रासहदानेपिवत्सस्यप्राधान्यादेकवच
नांतएवोहः॥अस्मन्ब्रलेत्सविकृलोमंत्रःप्रजापतेरितिच॥पुंवत्से॥स्त्रीवत्सेतु॥अस्मन्ब
त्सा॰हुताद्येमामाहिंसीरहुतामह्यं॰शिवाभव॥प्रजापतेर्भागोस्यूर्जस्वतीपयस्वतीप्र॰
प्रक्षितोस्यक्षित्यैत्वा॰लोके॥अयंवत्सोमृतस्यपूर्णः॰हिवंचैतेनवत्सेनान्तिरक्षिणिमृत्युं
॥स्त्रीवत्सेतु॥इयंवत्सामृतस्यपूर्णासहस्रधारोउत्सोअक्षीयमाणा॥सहस्रधारस्थितश्री
मंतरिक्षंदिवंचतयावत्सयातिनराणिमृत्युं॥वत्सेसासमुच्चयपक्षेहिवच्चनांतऊहः॥ब्रह्म श्री
णीब्रह्मणीस्थोब्रह्मणेवां॰हुताद्यौमामाहिं॰सिष्टंअहुतेमह्यं॰शिवौभवतं॥प्रजापतेर्भागौ
स्थऊर्जस्वंतौपयस्वंतौप्राणापानौमेपातं॰समानव्यानौमेपातमुदानव्यानौमेपात
मक्षितस्थोक्षित्यैवांमाभेक्षेष्माथा॰के॥इमेवत्सवासमीअमृतस्यपूर्णेसहस्रधारे

उत्से अक्षीयमाणे॥ तेहभ्रतुः पृथिवीमंतरिक्षं दिवं च ताभ्यां वस्त्रवासोभ्यामतिनराणि
रत्सु॥ ब्राह्मणा अयं वो वत्सो हिंसंतो यथा भागं प्रतिगृह्णीध्वं॥ इयं वो वत्सेति स्त्रिय॥
इमे वस्त्रवाससी इत्युभयोः॥ देवस्य त्वा० रुद्राय गामिति प्रतिग्रहः॥ रुद्राय गां तयेति स्त्रि
यः॥ यः पक्षे रुद्राय गां सोमाय वासो ग्नास्त्वा कृंतंन वसो अतन्वत वस्तुतिरहं येन वधो
यो अष्टत्वं त्वताभ्यामिमृतं भिन्नावेव प्रतिग्रहाविति वैजयंतीकारः॥ पुंवत्स एवं देय
ति तु युक्तं॥ न तु स्त्री वत्सः॥ अथ भूजो वत्सो दक्षिणेति श्रुतिलिंगात्॥ वत्सं ददातीति
तीयया निर्दिष्टं सूत्रकृता निष्क्रय द्रव्यदाने तु॥ ब्राह्मन्० हुताद्यमामा हिंसीरहुतं म
स्वः शिवं भव॥ प्रजापतेर्भागोस्यूर्जस्वान्पयस्वान्० अक्षितमस्यक्षित्यै० इदं वस्त्रवासो
निष्क्रयद्रव्यं मम तस्य पूर्णं सहस्रधारमुत्समक्षीयमाणं तद्वाधार पृथिवीमंतरिक्षं

समु द्रं ताप्रक्रि णो० तद्र स्वां येनिमपिग

द्विवंचेतेनवत्सनिष्क्रयइत्येणालितराणिमृत्युं॥वत्सनिष्क्रयइत्यंयथा॰देविदक्षिणेउ
त्तानायांगीरसःप्रतिगृण्हातुतेनामृतत्व॰इतिप्रतिग्रहः॥हविषोद्वासनादिभयथादे
वतंभुंजीतयः॥यजमानभागप्राशनेसंयज्ञपतिरितिपुराणस्य॥आचम्य॥भद्रान्नः
श्रेयः॰स्योनः॥नवभागप्राश्याचम्य॥अग्निःप्रथमःप्राश्नातुसहिवेदयथाहविः॥
शिवाअस्मभ्यमोषधीःकृणोतुविश्वचर्षणिः॥श्यामाकानांप्राश्येत्यादिसिद्धमिष्टिः
संतिष्ठते॥दशब्राह्मणान्भोजयेत्॥संतिष्ठतआग्रयणेष्टिः॥ ॥नानातंत्रश्यामाके
ष्टिपक्षेसौम्यचरुवर्जंपूर्ववत्॥व्रीह्याग्रयणंकुर्यात्॥अथयवाग्रयणं॥पक्वेषुयवेषु
वसंतेकस्मिंश्चित्पर्वणिपूर्वपक्षेदेवनक्षत्रेवाप्रातरग्निहोत्रोत्तरंगणेशंसंपूज्यपुण्या
हंवाचयित्वा॥ ॥अद्येत्यादि॰नवान्नप्राशनाधिकारसिद्धिद्वाराश्रीपरमेश्वरप्रीत्य
र्थंयवाग्रयणेष्ट्यायक्ष्ये॥अध्वर्युवरणादि॰अग्निंविहृत्यसमाम्ने॰अद्ययज्ञाय॥इ

भामूर्जंयथातिथिः॥आग्रयणीयंहविः॰आग्रयणेष्टंहविरितिवा॥अमावास्यतं
त्रं॥पात्रासंसादनकालेत्रयोदशकपालानिस्थालीसंप्रेक्षणस्येयन॥पात्र्यासह
यपात्रंप्रेक्षणेन॥प्रणीतादियथा॥अन्वाहार्यवर्जंमिलराणि॥प्रणीताप्रणयनं
व्रीह्याग्रयणवत्॥यवाग्रयणेनपुराणानांपुरोडाशः॥सर्वेपुराणानांव्रीहीणामिति
विशेषलिंगदर्शनात्॥निर्वपणकालेएकमेवबीजं॥आग्नेयसौम्यवर्जंदेवतात्रय
स्यनिर्वपणं॥पूर्ववदाज्यानीहोमः॥प्रोक्षणेदेवस्यत्वा॰भ्यांवोजुष्टंप्रोक्षामीन्द्राग्निभ्यां
विश्वेभ्योदेवेभ्योद्यावापृथिवीभ्यांशेषंपूर्ववद्देवतात्रयस्य॥नचतुर्धाकरणं॥वत्सः
वद्दक्षिणा॥यजमानभागप्राशने॥एतमुत्यंमधुनासंयुतंयुवंसरस्वत्याअधिम
नावचर्कृषुः॥इंद्रआसीत्सीरपतिःशतक्रतुःकीनाशाआसन्मरुतःसुदानवः॥इ
तिप्राश्यब्राह्मणतर्पणं[illegible]॥संतिष्ठतेयवाग्रयणं॥ ॥अथश्यामाकाग्रयणं॥ ८

अथश्यामाकाग्रयणं॥वर्षर्तौपर्वणिनक्षत्रेवा॥अद्येत्यादिपूर्ववदुक्त्वाश्यामाकाग्रय
णेस्यायक्ष्ये॥विहाराद्दिपूर्ववत्॥पौर्णमासंतंत्रं॥बर्हिषाव्रतं॥पंचदश्नासामिधेन्यः॥नोभा
ग्नी॥पात्रप्रयोगेस्थालीसंमेक्षणंस्फ्येनद्वंद्वं॥शम्याद्दषदुपलकुहरुमेक्षणप्रकृति
वत्॥बर्हिः॥मद्दंत्यन्वाहार्यस्थालीवर्जंप्रकृतिवत्॥श्यामाकबीजंनिर्वापेसोमाययजुष्टंनिर्वपा
मि॥पूर्ववदज्यानीहोमः॥हस्ताभ्यांवोजुष्टंप्रोक्षामिसोमाय॥नोच्चैःसमाजहि॥वर्षवृद्ध
मसीत्यादिहस्तेनतूषोपवापः॥प्रक्षालनंनिनीयधृष्टिरसीत्यादिस्थालीमुपधायभूर्पा
द्ववतंडुलान्समुप्यास्पृयघर्मोस्थविश्वायुषं॥मधिश्रित्यपर्यग्निकृत्यश्रपयित्वोत्स्नुके
प्रतिलप्याविद्दहंतेतिसंप्रेक्ष्यावेदाजादिउद्वासनकालेसूर्यज्योतिरित्यभिमंत्र्यतूष्णी
मभिघार्योऽर्ध्वोभुवनस्यसुहास्यदेवस्तेस्यलंकृत्यप्रियेणआसीदेत्यासाद्यप्रजा
पतिरसि॰अयंयज्ञः ममाग्ने॥चतुर्होताप्रवरणकालेसोमायानुब्रूहि॥सोमंयज॥

सामायेहं॰ सोमास्याहं॰ गृहाम्यासं॥ स्विष्टकृदादिनचतुर्थीकरणं दक्षिणाकालेतवे
द्विसौमेवासो निधायप्रहन्नभासीत्यादि॰ हुताद्यमामा हिंसीरहुतंमस्वः शिवंभव॥
प्रजापतेर्भागोस्यूर्जस्वत्पयस्वत्प्राणापानौमे॰ सहस्रधारमुत्समक्षीयमाणंतमाधारय
पिबी॰ तेनसौमेवासः सातिरराणिमृत्युं॥ इदंवोवासोयथाजति॰ सोमाथवासोग्नारत्वा
प्रतिग्रहः॥ यथादेवत्समुज्जितयः॥ अग्निःप्रथमप्राश्नातिलिप्राशनं॥ सिद्धमिष्टिःसंति
ष्ठते॥ श्यामाकाग्रयणंसंतिष्ठते॥ ॥अथाग्रयणानुकल्पावक्ष्यते॥ नेतुअनारब्धदर्श
पूर्णमासस्येष्टिरित्तिकृत्॥ अशक्तविषयमित्यन्ये॥ व्रीहियवाग्रयणयोरेवानुकल्पाः स
र्वे॥ श्यामाकाग्रयणस्यतुअग्निहोत्रीनवानादायतेकएवानुकल्पः॥ तेनचाहरदिपौ
र्णमास्याममावास्यायांचप्रकृतेष्टिंनवैरेवकुर्यात्॥ तत्रयजमानभागप्राशनेभद्रा
नइतिमंत्र्य॥ अपिवानवान्व्रीहि॥ न्यवान्वाअग्निहोत्र्येगवेभक्षणार्थंदत्वातस्याःपय ९

१० रपूर्वंश्रुतिस्मृतिप्ररिलिचित्तपूर्वं॥इष्टिद्व्यादिप्रतिपादनंचततोग्निहोत्रस्यनव
प्रसक्तिः॥१॥आरंभणंदर्शविधेःपरस्तादुत्सर्गपूर्वंपुनराहितिश्च॥तृतीयमा
धानमथाग्निहोत्रप्रवासजातंतुकृतेगृहस्य॥२॥ततप्रक्रमंसंगृहस्ययानंभाग्य
योगादिनित्यानुकल्पः॥एतत्समस्तंतुयथाधियामयानिरूपितंतत्सुविचारयेतां
बुधः॥३॥सूक्तंयदपिदुरुक्तंवायस्यात्तत्तुविशोध्यतां॥तल्लोदुंढिरहंभूयःप्रार्थ
येतद्विद्वज्जनान्॥४॥कृतिरियंभृगुवंशस्कवंशाकृत्सपरशुरामपद्माब्जसमर्पिता॥
मतिमतांतनुतांसनसोमुदंमखकृतांसुकृतफलभूरिदं॥५॥ ॥शके१७७६ज
यनामसंवत्सरेआश्विनशुक्लद्वादशीभौमवासरेतद्दिनेइदंपुस्तकंआपटेइत्युप
नामरामचंद्रसुतहरभटेनलिखितंसमाप्तं॥स्वार्थंपरार्थंवा॥छ॥ ॥छ॥॥ १०

सासायंप्रातर्हुत्वालौकिकन्नपात्रंभद्रान्नइतियाज्यालि॥अपिवाऽमावास्यायांपौर्णमा
स्यांवान्वलुःसरावमोदनंनवानांव्रीहीणांयाइविअयणोतंकृत्वाजुहुयात्नवंचसं
भृत्याज्यंसंस्कृत्यश्रृतंचरुमभिघार्योद्वास्यांतर्वेद्यांसाद्याहवनीयंपरिस्तीर्यपर्युक्ष्य
वत्सःसमिधआधायव्रीहीयवसानधर्मेणाब्रह्मौपनिषद्येनजुहोति॥नर्दवि
होमधर्मः॥आज्यहोमएवदर्विहोमधर्मः॥इंद्राग्निभ्यांस्वाहा॥विश्वेभ्योदेवेभ्य
इदं०द्यावापृथिवीभ्यांस्वाहा॥अग्नयेस्विष्टकृतेस्वाहा॥वत्सआज्याहुतीर्हुत्वा
परिषिच्यचरुशेषंचतुरोब्राह्मणान्भोजयित्वाचरुशेषंभद्रान्नइतिप्राश्नालि॥
यवाग्रयणेतन्मंत्रेण॥इत्याग्रयणानुकल्पः॥ ॥इतिसत्याषाढहिरण्यकेशीस
त्रानुसारीआधानपद्धतौसानुकल्पाग्रयणेष्टिप्रयोगः॥ ॥आधानमासावधिका

॥इतिज्ञानप्रयोगसिद्धियोगसमाप्तः॥